अस्य विवरणं तुलाशब्दे द्रष्टव्यम् ॥ (धर्म्मः ।
इति विष्णुनारदौ ॥ यथा,—
“अर्च्चयेत्तु घटं पूर्व्वं ततः शिरांश्च पूजयेत् ॥”
इति दिव्यतत्त्वधृतवचनम् ॥)
घटकः, पुं, (घटेन तुलया कायतीति । कै+कः ।)
चतुर्द्दशवल्लपरिमाणम् । द्विचत्वारिंशद्रक्तिका ।
इति लीलावती ॥ नन्दिवृक्षः । तत्पर्य्यायो यथा,
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
“धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः ॥”
घटपरीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा ।)
तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा ।
“पितामहः ।
‘छित्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥’
यूपवदिति यूपच्छेदनविहितसर्व्वेतिकर्त्तव्यतातिदेशः । सा च ॐ स्वधिते मैनं हिंसीरिति-च्छेदनमन्त्रविशेषादिरूपा इति व्यवहारप्रदीपः ॥
‘मन्त्रः सौम्यो वानस्पत्यच्छेदने जप्य एव च ।
चतुरस्रा तुला कार्य्या दृढा ऋज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु चार्थवत् ॥’
कटकानि वलयानि ।
‘चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ॥’
अत्र साधारणत्वेन शारदातिलकोक्तो हस्तो ग्राह्यः । यथा,—
‘चतुर्विंशत्यङ्गुलाढ्यं हस्तं तन्त्रविदो विदुः ।
यवानामष्टभिः क्लृप्तं मानाङ्गुलमितीरितम् ॥’
यवानां तण्डुलीकृतानाम् ।
‘यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
चतुर्व्विंशतिरङ्गुलैः ॥’
इति कालिकापुराणात् ॥
प्रमाणन्तु पार्श्वेन यवानाम् । ‘षड्यवाः पार्श्वसम्मिताः ।’ इति कात्यायनवचनात् ॥ * ॥
अनयोर्व्वस्थामाह कालिकापुराणम् ।
‘अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम ! ॥’
कन्यसं कनिष्ठम् । पादौ स्तम्भौ । उपरि मृत्तिकोपरि । तत्समौ चतुर्हस्तावित्यर्थः । वस्तुतस्तु उपरितत्समौ उपरि तत्समं कालान्तरं ययोः पादयोस्तौ ॥ * ॥ स्तम्भप्रमाणमाह व्यासः ।
‘हस्तद्वयं निखेयन्तु प्रोक्तं स्तम्भयोर्द्वयोः ।
षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः ॥’
स्तम्भयोः स्तम्भयोः । षड्हस्तं निखातहस्तद्वयेन समं अर्थान्मृत्तिकोपरि हस्तचतुष्टयमित्यर्थः ।
‘अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा ।’
तयोः स्तम्भयोः । हस्तावन्तरं हस्तद्वयमरिमितमध्यमित्यर्थः । अध्यर्द्धं सार्द्धहस्तद्वयम् । एतत्तु शालदयोऽव्यवा कार्य्या पञ्चहस्तायता तुला । इति विष्णूक्तपञ्चहस्तायततुलाविषयम् । व्यवहारदीपिकाप्येवम् ॥ * ॥
अथ घटारोपणविधिः । पितामहः ।
‘हस्तद्वयं निखेयन्तु पादयोरुभयोरपि ।’
अत्र हस्तद्वयं मृत्तिकाभ्यन्तरे । हस्तचतुष्टयं मृत्तिकोपरि । तथा,—
‘तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ॥
घटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥
मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ ।
प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटस्तथा ॥’
नारदः ।
‘शिक्यद्वयं समासाद्य घटकर्कटयोर्दृढम् ।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥’
पितामहः ।
‘प्राङ्मुखान् कल्पयेत् दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत् कर्त्तृनन्यस्मिन् मृत्तिकां शुभाम् ॥
पिटकं पूरयेत्तस्मिन् इष्टकाग्रावपांशुभिः ॥’
अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः ।
‘परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ।
कार्य्यः परीक्षकैर्नित्यमवलम्बसमो घटः ॥
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ।
यस्मिन्न प्लवते तोयं स विज्ञेयः समो घटः ॥
तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु ।
घटन्तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥
तत आवाहयेद्देवान् विधिनानेन मन्त्रवित् ।
वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः ॥
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥’
प्राड्विवाकसमाख्या तु पृच्छतीति प्राट् विवेचयतीति विवाकः । इति व्यवहारमातृका ॥ * ॥
तथा च बृहस्पतिः ।
‘विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥’
वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः ।
‘व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः ।
विवेचयति यस्तस्मिन् प्राड्विवाक इति स्मृतः ॥’
अभिशस्तं पृच्छतीति प्राट् तदनुरूपं दिव्यं विविनक्ति इति विवाकः । प्राट् चासौ विवाकश्चेति कर्म्मधारयः ॥ * ॥
अस्य काम्यत्वेन नवग्रहपूजामाह मत्स्यपुराणम् ।
‘नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥’
ततश्च प्राड्विवाकः पूर्व्वं कार्य्यं पृच्छेत् निवेदितञ्च विवेचयेत् । ततोऽभियुक्तं तोलयित्वा अवतार्य्य धर्म्मादावाहनादि कुर्य्यात् । पितामहः ।
‘एह्येहि भगवन् धर्म्म दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य च घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ॥’
अङ्गानि परिवारदेवताः ।
‘इन्द्रं पूर्व्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुवेरं उत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ * ॥
इन्द्रः पीतो यमः श्यामो वरुणः स्फाटिकप्रभः ।
कुवेरश्च सुवर्णाभो वह्निश्चापि सुवर्णभः ॥
तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेत् शुक्ल अनन्तः शुक्ल एव च ॥
ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ * ॥
देवेशेशानयोर्मध्ये आदित्यानां तथायनम् ।
धातार्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ॥
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥
इत्येते द्वादशादित्या मनुना परिकीर्त्तिताः ॥’
अजघन्यो जघन्यजः । इति विष्णोर्विशेषणम् ॥ * ॥
‘अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥
अजैकपादहिर्ब्रध्नः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥
स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः ॥’
महायशाः विशांपतिर्भगवांश्चेति विशेषणानि ॥
‘प्रेतेशरक्षसोर्मध्ये मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥’
गणसंयुतेति विशेषणम् ॥ * ॥
‘निरृतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥
श्वसनः स्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः ॥
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां देवतानाञ्च स्वनाम्ना पूजनं विदुः ॥’
विशेषमाह ब्रह्मपुराणम् ।
‘ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु ॥’
मन्त्र इत्यभिधानादनेनैवेत्येवकारश्रुतेश्च इदं द्रव्यं ओमसुकाय नमः इति योज्यं न तु धर्म्मार्घ्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम् । प्रमाणाभावादनन्वयाच्च । पितामहः ।
‘भूषावसानं धर्म्माय दत्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ॥
गन्धादिकां नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ।’
एतत् सर्व्वं प्राड्विवाकः कुर्य्यात् । यथा,—
‘प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतव्रतोपपन्नश्च शान्तचित्तो विमत्सरः ॥
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः ।
उपोषितः शुद्धवासाः कृतदन्तादिधावनः ॥
सर्व्वासां देवतानाञ्च पूजां कुर्य्याद्यथाविधि ॥’
रक्तगन्धपुष्पादीनाह नारदः ।
‘रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः ।
अर्च्चयेत्तु घटं पूर्व्वं ततः शिरांश्च पूजयेत् ॥’
घटं धर्म्मम् । तथा च विष्णुनारदौ ।
‘धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।’
शिरांसि इन्द्रादीन् । अविशेषात् सर्व्वत्र रक्ता-